# Shri Lalitatripurasundari Hridayastotram

# શ્રીલલિતાત્રિપુરસુન્દરીહૃદયસ્તોત્રમ્

## Document Information

Text title : shrIlalitAtripurasundarihRRidayastotram

File name : shrIlalitAtripurasundarihRRidayastotram.itx

Category : hRidaya, devii, dashamahAvidyA, lalitA, devI

Location : doc_devii

Transliterated by : PP

Proofread by : PP

Description-comments : from Kalyan-Mandir magazine

Latest update : October 19, 2014

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 8, 2021

*sanskritdocuments.org*

# શ્રીલલિતાત્રિપુરસુન્દરીહૃદયસ્તોત્રમ્

॥ શ્રીલલિતાત્રિપુરસુન્દર્યૈ નમઃ ॥

॥ અથ શ્રીમત્ લલિતાત્રિપુરસુન્દરીહૃદયસ્તોત્રસાધના ॥

ૐ શુદ્ધસ્ફટિકસઙ્કાશં દ્વિનેત્રં કરુણાનિધિમ્ ।
વરાભયકરં વન્દે શ્રીગુરું શિવરૂપિણમ્ ॥ ૧॥

ભક્તાજ્ઞાનતમોભાનું મૂર્ધ્નિ પઙ્કજસંસ્થિતમ્ ।
સદાશિવમયં નિત્યં શ્રીગુરું પ્રણમામ્યહમ્ ॥ ૨॥

શ્રીવિદ્યાં જગતાં ધાત્રીં સર્ગસ્થિતિલયેશ્વરીમ્ ।
નમામિ લલિતાં નિત્યં મહાત્રિપુરસુન્દરીમ્ ॥ ૩॥

બિન્દુત્રિકોણસંયુક્તં વસુકોણસમન્વિતમ્ ।
દશકોણદ્વયોપેતં ભુવનારસમન્વિતમ્ ॥ ૪॥

દલાષ્ટકસમોપેતં દલષોડશકાન્વિતમ્ ।
વૃત્તત્રયાન્વિતં ભૂમિસદનત્રયભૂષિતમ્ ॥ ૫॥

નમામિ લલિતાચક્રં ભક્તાનામેતદિષ્ટદમ્ ।
અમૃતામ્ભોનિધૌ તત્ર રત્નદ્વીપં નમામ્યહમ્ ॥ ૬॥

નાનાવૃક્ષમહોદ્યાનં વન્દેઽહં કલ્પવાટિકામ્ ।
સન્તાનવાટિકાં વન્દે હરિચન્દનવાટિકામ્ ॥ ૭॥

મન્દારવાટિકાં વન્દે પારિજાતાખ્યવાટિકામ્ ।
નમામિ તવ દેવેશિ કદમ્બવનવાટિકામ્ ॥ ૮॥

પુષ્પરાગમહારત્નપ્રાકારં પ્રણમામ્યહમ્ ।
પદ્મરાગાખ્યમણિભિઃ પ્રાકારં સર્વદા ભજે ॥ ૯॥

ગોમેદરત્નપ્રાકારં વજ્રપ્રાકારમાશ્રયે ।
વૈડૂર્યરત્નપ્રાકારં પ્રણમામિ તવેશ્વરિ ॥ ૧૦॥

ઇન્દ્રનીલાખ્યરત્નાનાં પ્રાકારં પ્રણમામ્યહમ્ ।
મુક્તારત્નમયં ચૈવ પ્રાકારં સર્વદા ભજે ॥ ૧૧॥

મરકતાખ્યમહારત્નપ્રાકારાય નમસ્તવ ।
વિદ્રુમાખ્યમહારત્નપ્રાકારં તુ તવાશ્રયે ॥ ૧૨॥

માણિક્યમણ્ડપં વન્દે સહસ્રસ્તમ્ભમણ્ડપમ્ ।
લલિતે તવ દેવેશિ ભજામ્યમૃતવાપિકામ્ ॥ ૧૩॥

આનન્દવાપિકાં વન્દે ભજે ચૈવ વિમર્શિકામ્ ।
ભજે બાલાતપોદ્ગારં ચન્દ્રિકોદ્ગારમાશ્રયે ॥ ૧૪॥

મહાશ‍ૃઙ્ગારપરિખાં મહાપદ્માટવીં ભજે ।
ચિન્તામણિમહારત્નગૃહરાજં નમામ્યહમ્ ॥ ૧૫॥

પૂર્વામ્નાયમયં પૂર્વદ્વારં દેવિ ભજામિ તે ।
દક્ષિણામ્નાય રૂપં તે દક્ષિણદ્વારમાશ્રયે ॥ ૧૬॥

નમામિ તે પરં દ્વારં પશ્ચિમામ્નાયરૂપકમ્ ।
વન્દેઽહમુત્તરં દ્વારમુત્તરામ્નાયરૂપકમ્ ॥ ૧૭॥

ઊર્ધ્વામ્નાયમઽહં વન્દે ઊર્ધ્વદ્વારં કુલેશ્વરિ ।
લલિતે તવ દેવેશિ મહાસિંહાસનં ભજે ॥ ૧૮॥

બ્રહ્માત્મકમઞ્ચપાદમેકં તવ નમામ્યહમ્ ।
એકં વિષ્ણુમયં મઞ્ચપાદં તવ નમામ્યહમ્ ॥ ૧૯॥

એકં રુદ્રમયં મઞ્ચપાદં તવ નમામ્યહમ્ ।
મઞ્ચપાદં નમામ્યેકં તવ દેવીશ્વરાત્મકમ્ ॥ ૨૦॥

મઞ્ચૈકફલકં વન્દે સદાશિવમયં શુભમ્ ।
નમામિ તે હંસતૂલતલિમાં પરમેશ્વરિ ॥ ૨૧॥

ભજામિ તે હંસતૂલ મહોપાધાનમુત્તમમ્ ।
કૌસુમ્ભાસ્તરણં દેવિ તવ નિત્યં નમામ્યહમ્ ॥ ૨૨॥

માનસપૂજા ।
મહાવિતાનકં વન્દે મહાજવનિકાં ભજે ।
એવં પૂજાગૃહં ધ્યાત્વા શ્રીચક્રસ્ય શિવપ્રિયે ॥ ૨૩॥

મદ્દક્ષિણે સ્થાપયામિ ભાગે પુષ્પાક્ષતાદિકમ્ ।
અભિતસ્તે મહાદેવિ દીપાઁસ્તાન્ દર્શયામ્યહમ્ ॥ ૨૪॥

મૂલેન ત્રિપુરાચક્રં તવ સમ્પૂજયામ્યહમ્ ।
ત્રિભિઃખણ્ડૈસ્તવ ત્ર્યસ્ત્રં પૂજયામિ શિવપ્રિયે ॥ ૨૫॥

વાય્વગ્નિજલસંયુક્તપ્રાણાયામૈરહં શિવે ।
શોષણં દાહનં દેવિ કરોમ્યાપ્લાવનં તથા ॥ ૨૬॥

ત્રિવારં મૂલમન્ત્રેણ પ્રાણાયામં કરોમ્યહમ્ ।
અપસર્પન્તુ તે ભૂતા યે ભૂતા ભૂમિસંસ્થિતાઃ ॥ ૨૭॥

યે ભૂતા વિઘ્નકર્તારસ્તે નશ્યન્તુ શિવાજ્ઞયા ।
કરોમ્યનેન મન્ત્રેણ તાલત્રયમહં શિવે ॥ ૨૮॥

નારાયણોઽહં બ્રહ્માઽહં ભૈરવોઽહં શિવોઽસ્મ્યહમ્ ।
દેવોઽહં પરમાત્માઽહં મહાત્રિપુરસુન્દરિ ॥ ૨૯॥

ધ્યાત્વૈવં વજ્રકવચં ન્યાસં તવ કરોમ્યહમ્ ।
કુમારીબીજસંયુક્તં મહાત્રિપુરસુન્દરિ ॥ ૩૦॥

માં રક્ષ રક્ષેતિ હૃદિ કરોમ્યઞ્જલિમીશ્વરિ ।
નમો દેવ્યાસનાયેતિ તે કરોમ્યાસનં શિવે ॥ ૩૧॥

ચક્રાસનં નમસ્યામિ સર્વમન્ત્રાસનં ભજે ।
સાધ્યસિદ્ધાસનં વન્દે મન્ત્રૈરેભિર્મહેશ્વરિ ॥ ૩૨॥

કરોમ્યસ્મિંશ્ચક્રમન્ત્રદેવતાસનમુત્તમમ્ ।
કરોમ્યથ ષડઙ્ગાખ્યં માતૃકાશ્ચ કરોમ્યહમ્ ॥ ૩૩॥

વશિન્યાદ્યષ્ટકં ન્યાસં ષોઢાન્યાસં કરોમ્યહમ્ ।
મહાષોઢાં તતઃ કુર્વે નવયોન્યાખ્યમુત્તમમ્ ॥ ૩૪॥

ચક્રન્યાસં તતઃ કુર્વે શ્રીકણ્ઠન્યાસમુત્તમમ્ ।
કેશવાદિ મહાન્યાસં કામન્યાસં કરોમ્યહમ્ ॥ ૩૫॥

કલાન્યાસં તતઃ કુર્વે કુર્વે કામકલાહ્વયમ્ ।
પીઠન્યાસં તતઃ કુર્વે તત્ત્વન્યાસં કરોમ્યહમ્ ॥ ૩૬॥

તતઃ કરોમિ સ્થિત્યાદિન્યાસં તત્ ત્રિપુરેશ્વરિ ।
તતઃ શુદ્ધોદકેનાહં વામભાગે મહેશ્વરિ ॥ ૩૭॥

કરોમિ મણ્ડલં વૃત્તં ચતુરસ્રં શિવપ્રિયે ।
પુષ્પૈરભ્યર્ચ્ય સાધારં શઙ્ખં સંસ્થાપયામ્યહમ્ ॥ ૩૮॥

અર્ચયામિ ષડઙ્ગેન જલમાપૂરયામ્યહમ્ ।
દદામિ ચાદિમં બિન્દું કુર્વે મૂલાભિમન્ત્રિતમ્ ॥ ૩૯॥

તજ્જલેન જગન્માતસ્ત્રિકોણં વૃત્તસંયુતમ્ ।
ષટ્કોણં ચતુરસ્ત્રં ચ મણ્ડલં પ્રકરોમ્યહમ્ ॥ ૪૦॥

વિદ્યયા પૂજનં મધ્યે ખણ્ડૈસ્ત્ર્યસ્રાભિપૂજનમ્ ।
બીજાવૃત્યા કોણષટ્કં પૂજયામિ શિવપ્રિયે ॥ ૪૧॥

તસ્મિન્ દશકલાયુક્તમગ્નિમણ્ડલમાશ્રયે ।
ધૂમાર્ચિષં નમસ્યામિ ઊષ્માં ચ જ્વલિનીં ભજે ॥ ૪૨॥

જ્વલિનીં ચ નમસ્યામિ વન્દેઽહં વિસ્ફુલ્લિઙ્ગિનીમ્ ।
સુશ્રિયં ચ સુરૂપાં ચ કપિલાં પ્રણમામ્યહમ્ ॥ ૪૩॥

નૌમિ હવ્યવહાં નિત્યં ભજે કવ્યવહાં કલામ્ ।
યાદિભિઃ સહિતા વહ્નેઃ કલા દશ તથા ભજે ॥ ૪૪॥

સૂર્યસ્ય મણ્ડલં તત્ર કલાદ્વાદશકાત્મકમ્ ।
અર્ઘ્યપાત્રે ત્વઽહં વન્દે તપિનીં તાપિનીં ભજે ॥ ૪૫॥

ધૂમ્રાં મરીચિં વન્દેઽહં જ્વાલિનીં ચ રુચિં ભજે ।
સુષુમ્ણાં ભોગદાં વન્દે ભજે વિશ્વાં ચ બોધિનીમ્ ॥ ૪૬॥

ધારિણીં ચ ક્ષમાં વન્દે સૌરા એતાઃ કલા ભજે ।
સોમસ્ય મણ્ડલં તત્ર કલાઃ ષોડશકાત્મકાઃ ॥ ૪૭॥

અર્ઘ્યામૃતાત્મકં વન્દેઽમૃતાં માનદાં સ્તુવે ।
પૂષાં તુષ્ટિં ભજે પુષ્ટિં રતિં ધૃતિમહં ભજે ॥ ૪૮॥

શશિનીં ચન્દ્રિકાં વન્દે કાન્તિં જ્યોત્સ્નાં શ્રિયં ભજે ।
નૌમિ પ્રીતિં ચાઙ્ગદાં ચ પૂર્ણાં પૂર્ણામૃતાં ભજે ॥ ૪૯॥

સ્વરૈઃ ષોડશભિર્યુક્તા ભજે સોમસ્ય વૈ કલાઃ ।
ત્રિકોણલેખનં કુર્વે અકથાદિસુરેખકમ્ ॥ ૫૦॥

હળક્ષવર્ણસંયુક્તં સ્થિતાન્તર્હંસભાસ્વરમ્ ।

વાક્કામશક્તિસંયુક્તં હંસેનારાધયામ્યહમ્ ॥ ૫૧॥

વૃત્તાદ્બહિઃ ષડસ્રે ચ લેખનં પ્રકરોમ્યહમ્ ।
પુરોભાગાદિ ષટ્કોણં ષડઙ્ગેનાર્ચયામ્યહમ્ ॥ ૫૨॥

શ્રીવિદ્યાયાઃ સપ્તવારં કરોમ્યત્રાભિમન્ત્રણમ્ ।
સમર્પયામિ વિશ્વેશિ તસ્મિન્ ગન્ધાક્ષતાદિકમ્ ॥ ૫૩॥

ધ્યાયામિ પૂજાદ્રવ્યં તે સર્વં વિદ્યામયં શુભમ્ ।
ચતુર્નવતિ સન્મન્ત્રાન્ સ્પૃષ્ટ્વા તત્પ્રજપામ્યહમ્ ॥ ૫૪॥

વહ્નેર્દશકલાઃ સૂર્યકલાદ્વાદશકં ભજે ।
આશ્રયે ષોડશકલાસ્તત્ર સોમસ્ય કામદાઃ ॥ ૫૫॥

સૃષ્ટિમૃદ્ધિં સ્મૃતિં વન્દે મેધાં કાન્તિં નમામ્યહમ્ ।
લક્ષ્મીં ધૃતિં સ્થિરાંવન્દે સ્થિતિં સિદ્ધિં ભજામ્યહમ્ ॥ ૫૬॥

એતાં બ્રહ્મકલાં વન્દે જરાં તાં પાલિનીં ભજે ।
શાન્તિં નમામીશ્વરીં ચ રતિં વન્દે ચ કામિકામ્ ॥ ૫૭॥

વરદાં હ્લાદિનીં વન્દે પ્રીતિં દીર્ઘાં ભજામ્યહમ્ ।
ટાદિભિઃ સહિતા વિષ્ણોઃ કલા દશ તથા ભજે ॥ ૫૮॥

એતા વિષ્ણોઃ કલા વન્દે તીક્ષ્ણાં રૌદ્રીં ભયાં તથા ।
નિદ્રાં તન્દ્રાં ક્ષુધાં વન્દે નમામિ ક્રોધિનીં ક્રિયામ્ ॥ ૫૯॥

ઉદ્ગારીં ચ ભજે મૃત્યુમેતા રુદ્રકલા ભજે ।
પીતાં શ્વેતાં ભજે નિત્યમરુણાં ચ તથા ભજે ॥ ૬૦॥

ભજેઽસિતાં તથાઽનન્તાં ષાદિભિઃ સહિતાસ્તથા ।
ઈશ્વરસ્ય કલા હ્યેતા વન્દે નિત્યમભીષ્ટદાઃ ॥ ૬૧॥

નિવૃત્તિં ચ પ્રતિષ્ઠાં ચ વિદ્યાં શાન્તિં નમામ્યહમ્ ।
ઇન્ધિકાં દીપિકાં ચૈવ રેચિકાં મોચિકાં તથા ॥ ૬૨॥

પરાં સૂક્ષ્માં નમસ્યામિ નૌમિ સૂક્ષ્મામૃતાં કલામ્ ।
વન્દે જ્ઞાનાં કલાં ચૈવ તથા જ્ઞાનામૃતાં કલામ્ ॥ ૬૩॥

આપ્યાયિનીં વ્યાપિનીં ચ વ્યોમરૂપાં નમામ્યહમ્ ।
કલાઃ સદાશિવસ્યૈતાઃ ષોડશ પ્રણમામ્યહમ્ ॥ ૬૪॥

હાંસાખ્યં ચ મહામન્ત્રં જ્યોતિષં હંસમાશ્રયે ।
પ્રતત્પ્રથમવિશ્રાન્તં મન્ત્રં જ્યોતિષમાશ્રયે ॥ ૬૫॥

ત્ર્યમ્બકં ચ નમસ્યામિ તદ્વિષ્ણોઃ પ્રણમામ્યહમ્ ।
વિષ્ણુર્યોનિં મૂલવિદ્યાં મન્ત્રૈરેભિરનુત્તમૈઃ ॥ ૬૬॥

અમૃતં મન્ત્રિતં વન્દે ચતુર્નવતિભિસ્તવ ।
અખણ્ડૈકરસાનન્દકરેઽપરસુધાત્મનિ ॥ ૬૭॥

સ્વચ્છન્દસ્ફુરણામત્ર નિધેહ્યકુલરૂપિણિ ।
અકુલસ્થામૃતાકારે શુદ્ધજ્ઞાનકરે પરે ॥ ૬૮॥

અમૃતત્વં નિધેહ્યસ્મિન્ વસ્તુનિ ક્લિન્નરૂપિણિ ।
તદ્રૂપિણ્યૈકરસ્યત્વં કૃત્વા હ્યેતત્સ્વરૂપિણિ ॥ ૬૯॥

ભૂત્વા પરામૃતાઽઽકારા મયિ ચિત્સ્ફુરણં કુરુ ।
અમૃતેશીં નમસ્યામિ સર્વદામૃતવર્ષિણીમ્ ॥ ૭૦॥

વાગ્વાદિનીં નમસ્યામિ શ્રીવિદ્યાં પ્રણમામ્યહમ્ ।
એભિર્મનૂત્તમૈર્વન્દે મન્ત્રિતં પરમામૃતમ્ ॥ ૭૧॥

જ્યોતિર્મયમિદં કુર્વે પરમર્ઘ્યં મહેશ્વરિ।
તદ્બિન્દુભિર્મે શિરસિ ત્રિગુરૂન્ પૂજયામ્યહમ્ ॥ ૭૨॥

બ્રહ્માઽહમસ્મિ તદ્બિન્દું કુણ્ડલિન્યા જુહોમ્યહમ્ ।
હૃચ્ચક્રસ્થા મહાદેવીં મહાત્રિપુરસુન્દરીમ્ ॥ ૭૩॥

નિરસ્તમોહતિમિરાં સાક્ષાત્ સંવિત્સ્વરૂપિણીમ્ ।
નાસાપુટે પરકલામથ નિર્ગમયામ્યહમ્ ॥ ૭૪॥

સમાનયામિ તાં હસ્તે ત્રિખણ્ડકુસુમાઞ્જલૌ ।
જગન્માતર્મહાદેવિ મહાત્રિપુરસુન્દરિ ॥ ૭૫॥

સુધાચૈતન્યમૂર્તિં તે કલ્પયામિ નમઃ શિવે ।
અનેન મનુના દેવિ યન્ત્રે ત્વાં સ્થાપયામ્યહમ્ ॥ ૭૬॥

મહાપદ્મવનાન્તઃસ્થે કારણાનન્દવિગ્રહે ।
સર્વભૂતહિતે માતરેહ્યેહિ પરમેશ્વરિ ॥ ૭૭॥

દેવેશિ ભક્તિસુલભે સર્વાવરણસંયુતે ।
યાવત્ ત્વાં પૂજયિષ્યામિ તાવત્ ત્વં સુસ્થિરા ભવ ॥ ૭૮॥

અનેન મન્ત્રયુગ્મેન ત્વામત્રાવાહયામ્યહમ્ ।
કલ્પયામિ નમઃ પાદ્યમર્ઘ્યં તે કલ્પયામ્યહમ્ ॥ ૭૯॥

સુગન્ધતૈલાભ્યઙ્ગં ચ મજ્જશાલાપ્રવેશનમ્ ।
કલ્પયામિ નમસ્તસ્મિન્ મણિપીઠોપવેશનમ્ ॥ ૮૦॥

દિવ્યસ્નાનીયમીશાનિ ગૃહાણોદ્વર્તનં શુભમ્ ।
ગૃહાણોષ્ણોદકસ્નાનં કલ્પયામિ નમસ્તવ ॥ ૮૧॥

હેમકુમ્ભચ્યુતૈસ્તીર્થૈઃ કલ્પયામ્યભિષેચનમ્ ।
કલ્પયામિ નમસ્તુભ્યં ધૌતેન પરિમાર્જનમ્ ॥ ૮૨॥

બાલભાનુપ્રતીકાશં દુકૂલપરિધાનકમ્ ।
અરુણેન દુકૂલેનોત્તરીયં કલ્પયામિ તે ॥ ૮૩॥

પ્રવેશનં કલ્પયામિ તવાલેપનમણ્ડપમ્ ।
નમસ્તે કલ્પયામ્યત્ર મણિપીઠોપવેશનમ્ ॥ ૮૪॥

અષ્ટગન્ધૈઃ કલ્પયામિ સર્વાઙ્ગેષુ વિલેપનમ્ ।
કાલાગરુ મહાધૂપસ્તવ કેશભરસ્ય હિ ॥ ૮૫॥

મલ્લિકામાલતીજાતીચમ્પકાદિમનોરમૈઃ ।
રચિતાઃકુસુમૈર્માલાઃ કલ્પયામિ નમસ્તવ ॥ ૮૬॥

પ્રવેશનં કલ્પયામિ નમો ભૂષણમણ્ડપમ્ ।
ઉપવેશં રત્નપીઠે તત્ર તે કલ્પયામ્યહમ્ ॥ ૮૭॥

નવમાણિક્યમુકુટં તચ્ચન્દ્રશકલં તતઃ ।
તતઃ સીમન્તસિન્દૂરં તતસ્તિલકમુત્તમમ્ ॥ ૮૮॥

કાલાઞ્જનં કલ્પયામિ પાલીયુગલમુત્તમમ્ ।
મણિકુણ્ડલયુગ્મં તે નાસાભરણમીશ્વરિ ॥ ૮૯॥

તે કલ્પયામિ ત્રિપુરે લલિતાઽધરયાવકમ્ ।
અથાઽઽદ્યભૂષણં કણ્ઠે હેમચિન્તાકમુત્તમમ્ ॥ ૯૦॥

પદકં તે કલ્પયામિ મહાપદકમુત્તમમ્ ।
કલ્પયામિ નમો મુક્તાવલિમેકાવલિં ચ તે ॥ ૯૧॥

છન્નવીરં ચ કેયૂરયુગલાનાં ચતુષ્ટયમ્ ।

વલયાવલિમીશાનિ ઊર્મિકાવલિમીશ્વરિ ॥ ૯૨॥

કાઞ્ચીદામકટીસૂત્રં સૌભાગ્યાભરણં ચ તે ।
ત્રિપુરે પાદકટકં કલ્પયે રત્નનૂપુરમ્ ॥ ૯૩॥

પાદાઙ્ગુલીયકં તુભ્યં પાશમેકકરે તવ ।
અન્યસ્મિન્નઙ્કુશં દેવિ પુણ્ડ્રેક્ષુધનુષં પરે ॥ ૯૪॥

અપરે પુષ્પબાણાઁશ્ચ શ્રીમન્માણિક્યપાદુકે ।
નવાવરણદેવીભિર્મહાચક્રાધિરોહણમ્ ॥ ૯૫॥

કામેશ્વરાઙ્કપર્યઙ્કુ ઉપવેશનમુત્તમમ્ ।
સુધાસવાખ્યં ચષકં તતઃ આચમનીયકમ્ ॥ ૯૬॥

કર્પૂરવીટિકાં તુભ્યં કલ્પયામિ નમઃ શિવે ।
આનન્દોલ્લાસવેલાસહાસં તે કલ્પયામ્યહમ્ ॥ ૯૭॥

મઙ્ગલારાર્તિકં દેવિ છત્રં તે કલ્પયામ્યહમ્ ।
તતશ્ચામરયુગ્મં તે દર્પણં કલ્પયામ્યહમ્ ॥ ૯૮॥

તાલવૃન્તં કલ્પયામિ ગન્ધં પુષ્પં મહેશ્વરિ ।
ધૂપં દીપં ચ નૈવેદ્યં કલ્પયામિ નમસ્તવ ॥ ૯૯॥

અથાઽહં વૈન્દવે ચક્રે સર્વાનન્દમયાત્મિકે ।
રત્નસિંહાસને રમ્યે સમાસીનાં શિવપ્રિયામ્ ॥ ૧૦૦॥

ધ્યાનમ્ ।
ઉદ્યદ્ભાનુસહસ્રાભ્યાં જપાપુષ્પસમપ્રભામ્ ।
નવરત્નપ્રભાદીપ્તમુકુટેન વિરાજિતામ્ ॥ ૧૦૧॥

ચન્દ્રરેખાસમોપેતાં કસ્તૂરીતિલકાઞ્ચિતામ્ ।
કામકોદણ્ડસૌન્દર્યનિર્જિતભ્રૂલતાયુગામ્ ॥ ૧૦૨॥

અઞ્જનાઞ્ચિતનેત્રાં તાં પદ્મપત્રનિભેક્ષણામ્ ।
મણિકુણ્ડલસંયુક્તકર્ણદ્વયવિરાજિતામ્ ॥ ૧૦૩॥

મુક્તામાણિક્યખચિતનાસિકાભરણાન્વિતામ્ ।
મદપાટલસંયુક્તકપોલયુગલાન્વિતામ્ ॥ ૧૦૪॥

પક્વબિમ્બફલાભાસાધરદ્વયવિરાજિતામ્ ।
શુદ્ધમુક્તાવલિપ્રખ્યદન્તપઙ્ક્તિવિરાજિતામ્ ॥ ૧૦૫॥

તામ્બૂલપૂરિતમુખીં સુસ્મિતાસ્યવિરાજિતામ્ ।
આદ્યભૂષણસંયુક્તાં હેમચિન્તાકસંયુતામ્ ॥ ૧૦૬॥

પદકેન સમોપેતાં મહાપદકસંયુતામ્ ।
મુક્તાવલિસમોપેતામેકાવલિવિરાજિતામ્ ॥ ૧૦૭॥

કેયૂરાઙ્ગદસંયુક્તચતુર્બાહુવિરાજિતામ્ ।
અષ્ટગન્ધસમોપેતાં શ્રીચન્દનવિલેપનામ્ ॥ ૧૦૮॥

હેમકુમ્ભસમપ્રખ્યસ્તનદ્વયવિરાજિતામ્ ।
રક્તવસ્ત્રપરીધાનાં રક્તકઞ્ચુકસંયુતામ્ ॥ ૧૦૯॥

સૂક્ષ્મરોમાવલીયુક્તતનુમધ્યવિરાજિતામ્ ।
મુક્તામાણિક્યખચિતકાઞ્ચીયુતનિતમ્બિનીમ્ ॥ ૧૧૦॥

સદાશિવાઙ્કસ્થપૃથુમહાજઘનમણ્ડલામ્ ।
કદલીસ્તમ્ભસઙ્કાશઊરુયુગ્મવિરાજિતામ્ ॥ ૧૧૧॥

કદલીકાન્તિસઙ્કાશજઙ્ઘાયુગલશોભિતામ્ ।
ગૂઢગુલ્ફદ્વયોપેતાં રક્તપાદયુગાન્વિતામ્ ॥ ૧૧૨॥

બ્રહ્માવિષ્ણુમહાદેવશિરોમુકુટજાતયા ।
કાન્ત્યા વિરાજિતપદાં ભક્તત્રાણપરાયણામ્ ॥ ૧૧૩॥

ઇક્ષુકાર્મુકપુષ્પેષુ પાશાઙ્કુશધરાં પરામ્ ।
સંવિત્સ્વરૂપિણીં દેવીં ધ્યાયામિ પરમેશ્વરીમ્ ॥ ૧૧૪॥

ઇતિ ધ્યાનમ્ ।
પ્રદર્શયામ્યથ શિવે નવમુદ્રા વરપ્રદાઃ ।
ત્વાં તર્પયામિ ત્રિપુરે ત્રિધા મૂલેન પાર્વતિ ॥ ૧૧૫॥

આગ્નેય્યામીશદિગ્ભાગે નૈરૃત્યાં મારુતે તથા ।
મધ્યે દિક્ષુ ષડઙ્ગાનિ ક્રમાદભ્યર્ચયામ્યહમ્ ॥ ૧૧૬॥

આદ્યાં કામેશ્વરીં વન્દે નમામિ ભગમાલિનીમ્ ।
નિત્યક્લિન્નાં નમસ્યામિ ભેરુણ્ડાં પ્રણમામ્યહમ્ ॥ ૧૧૭॥

વહ્નિવાસાં નમસ્યામિ મહાવજ્રેશ્વરીં સ્તુવે ।
શિવદૂતીં નમસ્યામિ ત્વરિતાં કુલસુન્દરીમ્ ॥ ૧૧૮॥

નિત્યાં નીલપતાકાં ચ વિજયાં સર્વમઙ્ગલામ્ ।
જ્વાલામાલાં ચ ચિત્રાં ચ મહાનિત્યાં ચ સંસ્તુવે ॥ ૧૧૯॥

દિવ્યૌઘેભ્યો નમસ્યામિ પરેશપરમેશ્વરીમ્ ।
મિત્રેશમથ ષષ્ઠીશમુડ્ડીશં પ્રણમામ્યહમ્ ॥ ૧૨૦॥

ચર્યાનાથં નમસ્યામિ લોપામુદ્રામહં ભજે ।
અગસ્ત્યં પ્રણમસ્યામિ સિદ્ધૌઘે કાલતાપનમ્ ॥ ૧૨૧॥

ધર્માચાર્યં નમસ્યામિ મુક્તકેશીશ્વરં ભજે ।
ભજે દીપકલાનાથં માનવૌઘે તતઃ પરમ્ ॥ ૧૨૨॥

વિષ્ણુદેવં નમસ્યામિ પ્રભાકરમહં ભજે ।
તેજોદેવં નમસ્યામિ મનોજમથ સંસ્તુવે ॥ ૧૨૩॥

કલ્યાણદેવં કલયે રત્નદેવં ભજામ્યહમ્ ।
વાસુદેવં નમસ્યામિ શ્રીરામાનન્દમાશ્રયે ॥ ૧૨૪॥

પરમેષ્ઠિગુરું વન્દે પરમં ગુરુમાશ્રયે ।
શ્રીગુરું પ્રણમસ્યામિ મૂર્ધ્નિ બ્રહ્મબિલે સ્થિતમ્ ॥ ૧૨૫॥

કં બિલેઽહં નમસ્યામિ શ્રીગુરોઃ પાદુકાં તતઃ ।
અથ પ્રાથમિકે દેવિ ચતુરસ્રે તવેશ્વરિ ॥ ૧૨૬॥

અણિમાં લઘિમાં વન્દે મહિમાં પ્રણમામ્યહમ્ ।
ઈશિત્વસિદ્ધિં વન્દેઽહં વશિત્વં ચ નમામ્યહમ્ ॥ ૧૨૭॥

પ્રાકામ્યસિદ્ધિં વન્દેઽહં ભુક્તિમિચ્છામહં ભજે ।
પ્રાપ્તિસિદ્ધિં સર્વકામપ્રદાસિદ્ધિમહં ભજે ॥ ૧૨૮॥

મધ્યમે ચતુરસ્રેઽહં બ્રાહ્મીં માહેશ્વરીં ભજે ।
કૌમારીં વૈષ્ણવીં વન્દે વારાહીં પ્રણમામ્યહમ્ ॥ ૧૨૯॥

માહેન્દ્રીમપિ ચામુણ્ડાં મહાલક્ષ્મીમહં ભજે ।
તૃતીયે ચતુરસ્રેઽહં સર્વસંક્ષોભિણીં ભજે ॥ ૧૩૦॥

સર્વવિદ્રાવિણીં મુદ્રાં સર્વાકર્ષિણિકાં ભજે ।
મુદ્રાં વશઙ્કરીં વન્દે સર્વોન્માદિનિકાં ભજે ॥ ૧૩૧॥

ભજે મહાઙ્કુશાં મુદ્રાં ખેચરીં પ્રણમામ્યહમ્ ।
બીજમુદ્રાં યોનિમુદ્રાં ભજે સર્વત્રિખણ્ડિનીમ્ ॥ ૧૩૨॥

ત્રૈલોક્યમોહનં ચક્રં નમામિ લલિતે તવ ।
નમામિ યોગિનીં તત્ર પ્રકટાખ્યામભીષ્ટદામ્ ॥ ૧૩૩॥

સુધાર્ણવાસનં વન્દે તત્ર તે પરમેશ્વરિ ।
ચક્રેશ્વરીં તત્ર વન્દે ત્રિપુરાં પરમેશ્વરીમ્ ॥ ૧૩૪॥

સર્વસંક્ષોભિણીં મુદ્રાં તતોઽહં કલયે શિવે ।
અથાઽહં ષોડશદલે કામાકર્ષણિકાં ભજે ॥ ૧૩૫॥

બુદ્ધ્યાકર્ષણિકાં વન્દેઽહઙ્કારાકર્ષણીં ભજે ।
શબ્દાકર્ષણિકાં વન્દે સ્પર્શાકર્ષણિકાં ભજે ॥ ૧૩૬॥

રૂપાકર્ષણિકાં વન્દે રસાકર્ષણિકાં ભજે ।
ગન્ધાકર્ષણિકાં વન્દે ચિત્તાકર્ષણિકાં ભજે ॥ ૧૩૭॥

ધૈર્યાકર્ષણિકાં વન્દે સ્મૃત્યાકર્ષણિકાં ભજે ।
નામાકર્ષણિકાં વન્દે બીજાકર્ષણિકાં ભજે ॥ ૧૩૮॥

આત્માકર્ષણિકાં વન્દે હ્યમૃતાકર્ષણીં ભજે ।
શરીરાકર્ષણીં વન્દે નિત્યાં શ્રીપરમેશ્વરીમ્ ॥ ૧૩૯॥

સર્વાશાપૂરકં ચક્રં કલયેઽહં તવેશ્વરિ ।
ગુપ્તાખ્યાં યોગિનીં વન્દે તત્રાઽહં ગુપ્તપૂજિતામ્ ॥ ૧૪૦॥

પીતામ્બુજાસનં તત્ર નમામિ લલિતે તવ ।
ત્રિપુરેશીં મહાદેવીં ભજામીષ્ટાર્થસિદ્ધિદામ્ ॥ ૧૪૧॥

સર્વવિદ્રાવિણીં મુદ્રાં તત્રાઽહં તાં વિચિન્તયે ।
શિવે તવાષ્ટપત્રેઽહમનઙ્ગકુસુમાં ભજે ॥ ૧૪૨॥

અનઙ્ગમેખલાં વન્દે હ્યનઙ્ગમદનાં ભજે ।
તતોઽહં પ્રણમસ્યામિ હ્યનઙ્ગમદનાતુરામ્ ॥ ૧૪૩॥

અનઙ્ગરેખાં કલયે ભજે તેઽનઙ્ગવેગિનીમ્ ।
ભજેઽનઙ્ગાઙ્કુશાં દેવિ તવ ચાનઙ્ગમાલિનીમ્ ॥ ૧૪૪॥

સર્વસંક્ષોભણં ચક્રં તત્રાઽહં કલયે સદા ।
વન્દે ગુપ્તતરાખ્યાં તાં યોગિનીં સર્વકામદામ્ ॥ ૧૪૫॥

તત્રાઽહં પ્રણમસ્યામિ દેવ્યાત્માસનમુત્તમમ્ ।

નમામિ જગદીશાનીમઽહં ત્રિપુરસુન્દરીમ્ ॥ ૧૪૬॥

સર્વાકર્ષણિકાં મુદ્રાં તત્રાઽહં કલયામિ તે ।
ભુવનારે તવ શિવે સર્વસંક્ષોભિણીં ભજે ॥ ૧૪૭॥

સર્વવિદ્રાવિણીં વન્દેઽહં સર્વાકર્ષિણિકાં ભજે ।
સકલાહ્લાદિનીં વન્દે સર્વસમ્મોહિનીં ભજે ॥ ૧૪૮॥

સકલ સ્તમ્ભિનીં વન્દે કલયે સર્વજૃમ્ભિનીમ્ ।
વશઙ્કરીં નમસ્યામિ સર્વરઞ્જનિકાં ભજે ॥ ૧૪૯॥

સકલોન્માદિનીં વન્દે ભજે સર્વાર્થસાધિનીમ્ ।
સમ્પત્તિપૂરિણીં વન્દે સર્વમન્ત્રમયીં ભજે ॥ ૧૫૦॥

ભજામ્યહં તતઃ શક્તિં સર્વદ્વન્દ્વક્ષયઙ્કરીમ્ ।
તત્રાઽહં કલયે ચક્રં સર્વસૌભાગ્યદાયકમ્ ॥ ૧૫૧॥

નમામિ જગતાં ધાત્રીં સમ્પ્રદાયાખ્યયોગિનીમ્ ।
શિવે તવ નમસ્યામિ શ્રીચક્રાસનમુત્તમમ્ ॥ ૧૫૨॥

નમામિ જગદીશાનીમહં ત્રિપુરવાસિનીમ્ ।
કલયેઽહં તવ શિવે મુદ્રાં સર્વવશઙ્કરીમ્ ॥ ૧૫૩॥

બહિર્દશારે તે દેવિ સર્વસિદ્ધિપ્રદાં ભજે ।
સર્વસમ્પત્પ્રદાં વન્દે ભજે સર્વપ્રિયઙ્કરીમ્ ॥ ૧૫૪॥

નમામ્યહં તતો દેવીં સર્વમઙ્ગલકારિણીમ્ ।
સર્વકામપ્રદાં વન્દે સર્વદુઃખવિમોચિનીમ્ ॥ ૧૫૫॥

સર્વમૃત્યુપ્રશમનીં સર્વવિઘ્નનિવારિણીમ્ ।
સર્વાઙ્ગસુન્દરીં દેવીં સર્વસૌભાગ્યદાયિનીમ્ ॥ ૧૫૬॥

સર્વાર્થસાધકં ચક્રં તથાઽહં કલયે સદા ।
કલયામિ તતો દેવીં કુલોત્તીર્ણાખ્યયોગિનીમ્ ॥ ૧૫૭॥

સર્વમન્ત્રાસનં વન્દે ત્રિપુરાશ્રીયમાશ્રયે ।
કલયામિ તતો મુદ્રાં સર્વોન્માદનકારિણીમ્ ॥ ૧૫૮॥

અન્તર્દશારે તે દેવિ સર્વજ્ઞાં પ્રણમામ્યહમ્ ।
સર્વશક્તિં નમસ્યામિ સર્વૈશ્વર્યપ્રદાં ભજે ॥ ૧૫૯॥

સર્વજ્ઞાનમયીં વન્દે સર્વવ્યાધિવિનાશિનીમ્ ।
સર્વાધારસ્વરૂપાં ચ સર્વપાપહરાં ભજે ॥ ૧૬૦॥

સર્વાનન્દમયીં વન્દે સર્વરક્ષાસ્વરૂપિણીમ્ ।
પ્રણમામિ મહાદેવીં સર્વેપ્સિતપ્રદાં ભજે ॥ ૧૬૧॥

સર્વરક્ષાકરં ચક્રં તત્રાઽહં કલયે સદા ।
નિગર્ભયોગિનીં વન્દે તત્રાઽહં પરમેશ્વરીમ્ ॥ ૧૬૨॥

સાધ્યસિંહાસનં વન્દે ભજે ત્રિપુરમાલિનીમ્ ।
કલયામિ તતો દેવિ મુદ્રાં સર્વમહાઙ્કુશામ્ ॥ ૧૬૩॥

અષ્ટારે વશિનીં વન્દે ભજે કામેશ્વરીં સદા ।
મોદિનીં વિમલાં વન્દે હ્યરુણાં જયિનીં ભજે ॥ ૧૬૪॥

સર્વેશ્વરીં નમસ્યામિ કૌલિનીં પ્રણમામ્યહમ્ ।
સર્વરોગહરં ચક્રં તવાઽહં દેવિ ચિન્તયે ॥ ૧૬૫॥

રહસ્યયોગિનીં દેવીં સદાઽહં કલયામિ તે ।
નમામિ ત્રિપુરાસિદ્ધાં ભજે મુદ્રાં ચ ખેચરીમ્ ॥ ૧૬૬॥

મહાત્રિકોણસ્ય બાહ્યે ચતુર્દિક્ષુ મહેશ્વરિ ।
નમામિ જૃમ્ભણાન્ બાણાન્ ચાપં સમ્મોહનં ભજે ॥ ૧૬૭॥

પાશં વશઙ્કરં વન્દે ભજે સ્તમ્ભનમઙ્કુશમ્ ।
ત્રિકોણેઽહં જગદ્ધાત્રીં મહાકામેશ્વરીં ભજે ॥ ૧૬૮॥

મહાવજ્રેશ્વરીં વન્દે મહાશ્રીમાલિનીં ભજે ।
મહાશ્રીસુન્દરીં વન્દે સર્વકામફલપ્રદામ્ ॥ ૧૬૯॥

સર્વસિદ્ધિપ્રદં ચક્રં તવ દેવિ નમામ્યહમ્ ।
નમામ્યતિરહસ્યાખ્યાં યોગિનીં તત્ર કામદામ્ ॥ ૧૭૦॥

ત્રિપુરામ્બાં નમસ્યામિ બીજમુદ્રાં નમામ્યહમ્ ।
મૂલમન્ત્રેણ લલિતે ત્વાં બિન્દૌ પૂજયામ્યહમ્ ॥ ૧૭૧॥

સર્વાનન્દમયં ચક્રં નમામિ લલિતે તવ ।
પરાપરરહસ્યાખ્યાં યોગિનીં કલયે સદા ॥ ૧૭૨॥

મહાચક્રેશ્વરીં વન્દે યોનિમુદ્રામહં ભજે ।
ધૂપાદિકં સર્વમયિ તે કલ્પયામ્યહમ્ ॥ ૧૭૩॥

ત્વત્પ્રીતયે મહામુદ્રાં દર્શયામિ તતઃ શિવે ।
ત્રિધા ત્વાં મૂલમન્ત્રેણ તર્પયામિ તતઃ શિવે ॥ ૧૭૪॥

શાલ્યન્નં મધુસંયુક્તં પાયસાપૂપસંયુતમ્ ।
ઘૃતસૂપસમાયુક્તં સર્વભક્ષ્યસમન્વિતમ્ ॥ ૧૭૫॥

સસિતં ક્ષીરસંયુક્તં બહુશાકસમન્વિતમ્ ।
નિક્ષિપ્ય કાઞ્ચને પાત્રે નૈવેદ્યં કલ્પયામિ તે ॥ ૧૭૬॥

સઙ્કુલ્પ્ય બિન્દુના વક્ત્રં કુચૌ બિન્દુદ્વયેન ચ ।
યોનિં તુ સપરાર્ધેન કૃત્વા શ્રીત્રિપુરે તવ ॥ ૧૭૭॥

એતત્ કામકલારૂપં ભક્તાનાં સર્વકામદમ્ ।
સર્વસમ્પત્પ્રદં વન્દે નમસ્તે ત્રિપુરેશ્વરિ ॥ ૧૭૮॥

વામભાગે ત્રિકોણં ચ વૃત્તં ચ ચતુરસ્રકમ્ ।
કૃત્વા ગન્ધાક્ષતાદ્યૈશ્ચ હ્યર્ચયામિ મહેશ્વરિ ॥ ૧૭૯॥

વાગ્ભવાદ્યં નમસ્યામિ તત્ર વ્યાપકમણ્ડલમ્ ।
જલયુક્તાર્દ્રાન્નયુક્તં મકારત્રયભાજનમ્ ॥ ૧૮૦॥

તત્ર વિન્યસ્ય દાસ્યામિ ભૂતેભ્યો બલિમુત્તમમ્ ।
નમસ્તે દેવદેવેશિ નમસ્ત્રૈલોક્યવન્દિતે ॥ ૧૮૧॥

નમઃ પરશિવાઙ્કસ્થે નમસ્ત્રિપુરસુન્દરિ ।
પ્રદક્ષિણાં નમસ્કારં મનસાઽહં કરોમિ તે ॥ ૧૮૨॥

તતઃ સકલમન્ત્રાણાં સમ્રાજ્ઞીં પરમેશ્વરીમ્ ।
પ્રજપામિ મહાવિદ્યાં ત્વત્પ્રીત્યાર્થમહં સદા ।
તવ વિદ્યાં પ્રજપ્ત્વાઽથ સ્તૌમિ ત્વાં પરમેશ્વરીમ્ ॥ ૧૮૩॥

મહાદેવિ મહેશાનિ સદાશિવ મહાપ્રિયે ।
મહાનિત્યે મહાસિદ્ધે ત્વામહં શરણં વ્રજે ॥ ૧૮૪॥

જય ત્વં ત્રિપુરે દેવિ લલિતે જગદીશ્વરિ ।
સદાશિવપ્રિયકરિ પાહિ માં કરુણાકરિ ॥ ૧૮૫॥

જગન્માતર્જગદ્રૂપે જગદીશ્વરવલ્લભે ।
જગન્મયે જગસ્તુલ્યે ગૌરિ ત્વામહમાશ્રયે ॥ ૧૮૬॥

અનાદ્યે સર્વલોકાનામાદ્યે ભક્તેષ્ટદાયિનિ ।
ગિરિરાજસ્ય તનયે નમસ્તે ત્રિપુરેશ્વરિ ॥ ૧૮૭॥

જયાદિદેવદેવેશિ બ્રહ્મમાતર્નમોઽસ્તુ તે ।
વિષ્ણુમાતરનાદ્યન્તે હરમાતઃ સુરેશ્વરિ ॥ ૧૮૮॥

બ્રહ્માદિસુરસંસ્તુત્યે લોકત્રયવશઙ્કરિ ।
સર્વસમ્પત્પ્રદે નિત્યે ત્વામહં કલયે સદા ॥ ૧૮૯॥

નિત્યાનન્દે નિરાધારે ચિદ્રૂપિણિ શિવપ્રિયે ।
અણિમાદિગુણાધારે ત્વાં સદા કલયામ્યહમ્ ॥ ૧૯૦॥

બ્રાહ્મ્યાદિમાતૃસંસ્તુત્યે સર્વાવરણસંયુતે ।
જ્યોતિર્મયે મહારૂપે પાહિ માં ત્રિપુરે સદા ॥ ૧૯૧॥

લક્ષ્મીવાણ્યાદિસમ્પૂજ્યે બ્રહ્મવિષ્ણુશિવસ્તુતે ।
ભજામિ તવ પાદાબ્જં સર્વકામફલપ્રદમ્ ॥ ૧૯૨॥

સર્વશક્તિસમોપેતં સર્વાભીષ્ટફલપ્રદે ।
નમામિ તવ પાદાબ્જં દેવિ ત્રિપુરસુન્દરિ ॥ ૧૯૩॥

ત્વત્પ્રિયાર્થં તતઃ કાંશ્ચિચ્છક્તિં સમ્પૂજયામ્યહમ્ ।
મપઞ્ચકેન તાં શક્તિં તર્પયામિ મહેશ્વરિ ॥ ૧૯૪॥

તયોપેતં હવિઃશેષં ચિદગ્નૌ પ્રજુહોમ્યહમ્ ।
ત્વત્પ્રિયાર્થં મહાદેવિ મમાભીષ્ટાર્થસિદ્ધયે ॥ ૧૯૫॥

બદ્ધ્વા તાં ખેચરીં મુદ્રાં ક્ષમસ્વોદ્વાસયામ્યહમ્ ।
તિષ્ઠ મે હૃદયે નિત્યં ત્રિપુરે પરમેશ્વરિ ॥ ૧૯૬॥

જગદમ્બે મહારાજ્ઞિ મહાશક્તિ શિવપ્રિયે ।
હૃચ્ચક્રે તિષ્ઠ સતતં મહાત્રિપુરસુન્દરિ ॥ ૧૯૭॥

સર્વલોકૈકસમ્પૂજ્યે સકલાવરણૈર્યુતે ।
હૃચ્ચક્રે તિષ્ઠ મે નિત્યં મહાત્રિપુરસુન્દરિ ॥ ૧૯૮॥

॥ ફલશ્રુતિ ॥

એતત્ ત્રિપુરસુન્દર્યા હૃદયં સર્વકામદમ્ ।
મહારહસ્યં પરમં દુર્લભં દૈવતૈરપિ ॥ ૧॥

સાક્ષાત્ સદાશિવેનોક્તં ગુહ્યાદ્ગુહ્યમનુત્તમમ્ ॥ ૨॥

યઃ પઠેન્નિત્યમેકાગ્રઃ શ‍ૃણુયાદ્ વા સમાહિતઃ ।
નિત્યપૂજાફલં દેવ્યાઃ સ લભેન્નાત્ર સંશયઃ ॥ ૩॥

પાપૈઃ સ મુચ્યતે સદ્યઃ કાયવાક્ચિત્તસમ્ભવૈઃ ।
સર્વજન્મસમુદ્ભૂતૈર્જ્ઞાનકૃતૈરપિ ॥ ૪॥ missing letter or word
સર્વક્રતુષુ યત્પુણ્યં સર્વતીર્થેષુ યત્ ફલમ્ ।
તત્પુણ્યં લભતે નિત્યં માનવો નાત્ર સંશયઃ ॥ ૫॥

અચલાં લભતે લક્ષ્મીં ત્રૈલોક્યે ચાપિ દુર્લભામ્ ।
સાક્ષાદ્ વિષ્ણુસમો મર્ત્યો શીઘ્રમેવ ભવેત્ સદા ॥ ૬॥

અષ્ટૈશ્વર્યમવાપ્નોતિ સ શીઘ્રં માનવોત્તમઃ ।
ગુટિકાપાદુકાસિદ્ધ્યાદ્યષ્ટકં શીઘ્રમશ્નુતે ॥ ૭॥

શઙ્ખાદ્યા નિધ્યો વાઽપિ તં નિત્યં પર્યુપાસતે ।
વશ્યાદીન્યષ્ટકર્માણિ શીઘ્રં સિદ્ધ્યન્તિ સર્વદા ॥ ૮॥

ભૂલોકસ્થાઃ સર્વનાર્યઃ પાતાલસ્થાઃ સદાઙ્ગનાઃ ।
સર્વલોકસ્થિતાઃ સર્વા યાશ્ચાન્યારૂપગર્વિતાઃ ॥ ૯॥

રમન્તે તેન સતતં શીઘ્રં વશ્યા ન સંશયઃ ।
રાજાદ્યાઃ સકલા મર્ત્યાઃ હરહર્યાદયઃ સુરાઃ ॥ ૧૦॥

અનન્તાદ્યા મહાનાગાઃ સિદ્ધયોગેશ્વરાદયઃ ।
ઋષયો મુનયો યક્ષાસ્તં નિત્યં પર્યુપાસતે ॥ ૧૧॥

મહતીં કીર્તિમાપ્નોતિ શિવવિષ્ણુસમપ્રભામ્ ।
પરમં યોગમાસાદ્ય ખેચરો જાયતે સદા ॥ ૧૨॥

અપમૃત્યુવિનિર્મુક્તઃ કાલમૃત્યુવિવર્જિતઃ ।
પરમાયુષ્યમાપ્નોતિ હરહર્યાદિદુર્લભમ્ ॥ ૧૩॥

અશ્રુતાનિ ચ શાસ્ત્રાણિ વ્યાચષ્ટે વિધિવત્ સદા ।
મૂઢોઽપિ સર્વવિદ્યાવાન્ દક્ષિણામૂર્તિવદ્ભવેત્ ॥ ૧૪॥

ગ્રહભૂતપિશાચાદ્યા યક્ષગન્ધર્વરાક્ષસાઃ ।
એતસ્ય સ્મરણાદેવ વિનશ્યન્તિ હિ સર્વદા ॥ ૧૫॥

તદ્ગાત્રં પ્રાપ્ય સકલં વિષં સદ્યો વિનશ્યતિ ।

સહસ્રકામસઙ્કાશઃ કાન્ત્યા યઃ સર્વદા ભવેત્ ॥ ૧૬॥

તસ્માદેતત્ પઠેત્ સ્તોત્રં ત્રિપુરાહૃદયં શુભમ્ ।
જપેદ્ યઃ સર્વદા સાક્ષાદ્ ભવેદ્ દેવીસ્વરૂપકઃ ॥ ૧૭॥

સાઙ્ગં ત્રિપુરસુન્દર્યા નિત્યપૂજાફલં લભેત્ ।
વિમુક્તો રોગસઙ્ઘાતૈરારોગ્યં મહદશ્નુતે ॥ ૧૮॥

પ્રાપ્નોતિ મહદૈશ્વર્યં સર્વવિદ્યાનિધિર્ભવેત્ ।
તત્કરસ્પર્શમાત્રેણ નરો બ્રાહ્મણતાં લભેત્ ॥ ૧૯॥

મુચ્યતે સકલૈર્વિઘ્નૈઃ સ નિત્યં માનવોત્તમઃ ।
સ ભુઙ્ક્તે સકલાન્ ભોગાન્ દુર્લભાંશ્ચ દિને દિને ॥ ૨૦॥

લભતે પુત્રપૌત્રાંશ્ચ મહાલક્ષ્મીસમન્વિતાન્ ।
પરમાયુષ્યસંયુક્તાન્ સાક્ષચ્છિવસમાન્ ગુણૈઃ ॥ ૨૧॥

સૃષ્ટિપાલનસંહારકર્તેવાયં સદા ભવેત્ ।
યસ્તે કૃપાવાન્ ભવતિ સ ત્રિમૂર્તિર્ન સંશયઃ ॥ ૨૨॥

તત્સમીપસ્થિતઃ શીઘ્રં સદા જાતિસ્મરોભવેત્ ।
તસ્ય ગેહે સદા કામધેનુઃ કલ્પતરુસ્તથા ॥ ૨૩॥

ચિન્તામણિશ્ચ સતતં તિષ્ઠત્યેવ ન સંશયઃ ।
મહાજયમવાપ્નોતિ સદા સર્વત્ર માનવઃ ॥ ૨૪॥

વજ્રકાયસમો ભૂત્વા ચરત્યેવ જગત્યયમ્ ।
મહાસુખી ભવેન્નિત્યં પરમાત્મા ભવેત્ સદા ॥ ૨૫॥

મુચ્યતે સકલેભ્યોઽપિ બન્ધનૈઃ શૃઙ્ખલાદિભિઃ ।
તં પૂજયન્તિ સતતં હરિરુદ્રાદયોઽપિ ચ ॥ ૨૬॥

શુભમેવ ભવેન્નિત્યં સદાપદ્ભિર્વિમુચ્યતે ।
દેવગન્ધર્વરક્ષાદ્યૈર્બ્રહ્માદ્યૈરપિ દુર્લભાન્ ॥ ૨૭॥

પ્રાપ્નોતિ સકલાન્ કામાન્ શીઘ્રમેવ ન સંશયઃ ।
દિવ્યભોગયુતો દિવ્યકન્યાભિઃ સહ સંયુતઃ ॥ ૨૮॥

વિમાનં સ સમાસ્થાય દિવ્યાભરણભૂષિતઃ ।
દિવ્યચન્દનલિપ્તાઙ્ગઃ સદા વિંશતિવાર્ષિકઃ ॥ ૨૯॥

સ ભુઙ્ક્તે સકલાન્ ભોગાન્ દેવલોકે નરઃ સદા ।
તસ્માદેતત્ પઠેત્ સ્તોત્રં ત્રિપુરાહૃદયં શુભમ્ ।
જપેદ્ધઃ સતતં ભક્ત્યા ભવેત્ સાક્ષાત્ સદા શિવઃ ॥ ૩૦॥

॥ ઇતિ શ્રી રુદ્રયામલે ઈશ્વરપાર્વતીસંવાદે
શ્રીલલિતાત્રિપુરસુન્દરીહૃદયસ્તોત્રમ્ ॥

Encoded and proofread by PP
From Shrividya Sadhana.

---

*Shri Lalitatripurasundari Hridayastotram*
pdf was typeset on June 8, 2021

Please send corrections to *sanskrit@cheerful.com*